# Shri Raghavendra Duhkhaharana Stotram

# શ્રીરાઘવેન્દ્રદુઃખહરણસ્તોત્રમ્

## Document Information

Text title : Shri Raghavendra Duhkhaharana Stotram

File name : rAghavendraduHkhaharaNastotram.itx

Category : deities_misc, gurudev, stotra

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 18, 2021

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રદુઃખહરણસ્તોત્રમ્

શ્રીપતિબોધવિબોધક બાધકસાધિતસાધન ભોઃ ।
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં મે પરિહર ભોઃ ॥ ૧॥

રાજમુખીરતિસમ્ભ્રમલોલુપચિત્તતયા વ્યચરં બહુ ભોઃ ।
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં મે પરિહર ભોઃ ॥ ૨॥

ઘટતાં મે કથમસ્ય દુરાચરણં ચરતો હિતકૃદ્ભુવિ ભોઃ ।
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં મે પરિહર ભોઃ ॥ ૩॥

વેદપુરાણવિરુદ્ધકૃતો મે નાન્યઃ ત્વત્તઃ પાતા ભોઃ ।
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં મે પરિહર ભોઃ ॥ ૪॥

દ્રાગિષ્ટં દાસ્યસિ ભક્તેભ્યસ્ત્વમિતિ શ્રુત્વા ત્વાપં ભોઃ ।
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં પરિહર ભોઃ ॥ ૫॥

યદ્યપિ દયાલુરિતિ વિખ્યાતસ્તર્હિ દ્રક્ષં મામુદ્ધર ભોઃ । યદ્યસિ દયાલુરિતિ
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં મે પરિહર ભોઃ ॥ ૬॥

ન મમોદ્ધર્તા ચેત્ ત્વં ભુવિ તે દિવિજદ્રુમ ઇતિ સુયશઃ કિં ભોઃ ।
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં મે પરિહર ભોઃ ॥ ૭॥

માયાપાશવિબદ્ધો નાહં જાને વિવેકલવમપિ ભોઃ ।
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં મે પરિહર ભોઃ ॥ ૮॥

કૃષ્ણાવધૂતવિરચિતમષ્ટકમેતત્ પઠતાં સકલં ભોઃ ।
રાઘવેન્દ્રગુરુરાજ ભવોદ્ભવદુઃખમિદં પરિહર ભોઃ ॥ ૯॥

ઇતિ શ્રીકૃષ્ણાવધૂતવિરચિતે શ્રીરાઘવેન્દ્રતન્ત્રે નવમપટલે
દુઃખહરણસ્તોત્રં નામ તૃતીયોઽધ્યાયઃ સમ્પૂર્ણઃ ।

Proofread by Gopalakrishnan, PSA Easwaran

*Shri Raghavendra Duhkhaharana Stotram*

pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*